International Journal of Sanskrit Research 2021; 7(5): 349-351

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 349-351
© 2021 IJSR
www.anantaajournal.com
Received: 22-07-2021
Accepted: 28-08-2021

**डॉ. सुभाषचन्द्र मीणा**
सहायकाचार्यः (व्याकरणविभागः)
केन्द्रीयसंस्कृतविश्वविद्यालयः क. जे. सोमैयापरिसरः, विद्याविहारः, मुम्बई, महाराष्ट्र, भारत

**Corresponding Author:**
**डॉ. सुभाषचन्द्र मीणा**
सहायकाचार्यः (व्याकरणविभागः)
केन्द्रीयसंस्कृतविश्वविद्यालयः क. जे. सोमैयापरिसरः, विद्याविहारः, मुम्बई, महाराष्ट्र, भारत

# परिभाषेन्दुशेखरेऽनुबन्धाः विमर्शः

**डॉ. सुभाषचन्द्र मीणा**

**शोधसारः**
अनुबन्धवर्णाः ण् च् क् श् ङेत्यादयः प्रत्ययानामवयवाः न वेति संदेहे पूर्वपक्षिमतानुवादाय नागेशेनानवयवत्वपक्षप्रतिपादनाय अनेकान्ताः अनुबन्धाः इति परिभाषा अवतारिता। अस्यां परिभाषायामनेकान्ता इति पदस्यानवयवा इत्यर्थः। अणादिप्रत्यायहारेषु ये णकारादयोऽनुबन्धवर्णाः ते प्रत्ययानामवयवा न भवन्ति । अत एव ते कदाऽपि लक्ष्येषु नैव दृश्यन्ते । नागेशोऽत्र 'वस्तुतस्तु एकान्ता इत्येव न्याय्यम्' इत्यादिवाक्यै ग्रन्थे सिद्धान्तपक्षं प्रादर्शयत्। अनुबन्धानामवयवत्वपक्ष एव प्रामाणिको भाष्यकारसम्मतश्च । अत एव उभयपदमनुबन्धे किमत्र न्याय्याम्? एकान्ता इत्येव न्याय्याम् इति ''तस्य लोपः''[1]इति सूत्रस्थं भाष्यं सङ्गच्छते । अनुबन्धानामवयवत्वे अनेकाल्शित् सर्वस्य इति सूत्रे शिद्ग्रहणमेव व्यर्थीभूयैनां परिभाषां ज्ञापयति–नानुबन्ध्कृतमनेकाल्त्वम् इति ।
अवदातमिति प्रयोगानापत्तिरित्याशङ्कायां नागेशेन परिभाषेन्दुशेखरे 'नानुबन्धकृतमनेजन्तत्वम्' इति परिभाषा अवतारिता । अनुबन्धकृतमनेजन्तत्वं कार्यप्रयोजकं न भवतीति तत्परिभाषार्थः । अपवादप्रत्ययोत्सर्ग निरूपितमनुबन्धप्रयुक्तमसारूप्यं नैवाश्रयणीयमिति नानुबन्धकृतमसारूप्यम् इत्यस्याः अर्थः । ददाति ''दधात्येर्विभाषा'' इति णबाधकशस्य विकल्पविधायकमस्याः ज्ञापकम्।

**सङ्केतशब्दाः** अनेकान्ताः, एकान्ताः, उत्सर्गप्रत्ययः, अपवादप्रत्ययः, असारूप्यम्, अनेकाल्त्वम्, अनेजन्तत्वम्

## प्रस्तावना
सम्प्रति लोके व्याकरणमिति चेत् पाणिनीयमेव । तस्य पाणिनीयव्याकरणस्य प्राथमिको भवति तेन विचरितोऽष्टाध्यायीग्रन्थः । स च सूत्ररूपः । तस्मिन् ग्रन्थे अष्टावध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च वर्तन्ते । तत्र भगवता पाणिनिना केवलं सूत्रप्रणयनमेवाकारि । तत्र ग्रन्थे विद्यमानेषु सूत्रेषु इत्संज्ञकवर्णाः नैक विराजन्ते । तेषु हल्वर्णानां 'हलन्त्यम्' इति सूत्रेण अज्वर्णानाम् 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण चेत्संज्ञा विधीयते । येषामित्संज्ञा विधीयते तेषामित्संज्ञकवर्णानां 'तस्य लोपः' इति सूत्रेण लोपो भवति । ते चेत्संज्ञकवर्णाः पाणिनीये पदशास्त्रे अनुबन्धः इति नाम्ना व्यपदिश्यन्ते । तत्रानुबन्धो नाम कः? तस्य व्युत्पत्त्यर्थः कः? किं नामानुबन्धस्य लक्षणमित्यादिजिज्ञासायां परिभाषेन्दुशेखरे अनुबन्धपदस्य व्युत्पत्त्यर्थः, अनुबन्धत्वपरिष्कारश्च नागेशेन अभिवर्णितः ।
'यथोद्देशम् संज्ञापरिभाषम्' अस्मिन् परिभाषायां संज्ञापरिभाषाश्च सूत्राणां विषये विवरणं वर्तन्ते । संज्ञायां इत् संज्ञा प्रथमं तथा च व्याकरणशास्त्रीय प्रवृत्त्या प्रयोजकोऽस्ति । यतोहि भाष्यकारआह – 'इत् संज्ञोत्तर प्रत्याहारः' अर्थात् इत् संज्ञायाः अनन्तरं प्रत्याहाराः जायते । ते प्रत्याहाराः व्याकरणशास्त्रस्य आधारभूताः सन्ति । अतः इत् संज्ञायाः व्याकरणशास्त्रे महत्त्वपूर्णस्थानं वर्तते ।
अतः उक्तं च परिभाषेन्दुशेखरकार इत्संज्ञक अनुबन्ध । तेषु अवयवत्व अनवयवत्व संदेह आह – तात्पर्यमस्ति यत् यस्य इत् संज्ञा भवति अथवा इत्संज्ञक योग्यस्यात् सैव अनुबन्ध कथ्यते ।

## अनुबन्धपदस्यार्थः –
इत्संज्ञावर्णस्यैवानुबन्धवर्ण इति नामान्तरं वर्तते । तत्रानुबन्धपदेऽनुबध्यते । असावनुबन्ध इति व्युत्पत्त्या अनुपूर्वाद् बध्नातेः कर्मणि घञ्प्रत्ययः । अनोप्रधानवाचित्वाद् बध्नातेरूच्चारणार्थकत्वाच्चाचार्यकर्तृकाप्रधानी– भूतोच्चारणविषयत्वमनुबन्धपदार्थो भवति । 'कर्तरि शप्'[2] इत्यत्र प्रकृतानुबन्धत्वस्य लक्षणसमन्वयः ।

## सामग्री
### अनेकान्ता अनुबन्धा इति सिद्धान्तविचारः –
तत्रानुबन्धवर्णास्तत्तद्धातु प्रत्ययागमादेशानामवयवा न वेति संदेहे इति जाते पूर्वपक्षरूपेण अनेकान्ता अनुबन्धा इति । अनेकान्ताः अनवयवा इत्यर्थः । यो ह्यवयवः स कदाचित् तत्रोपलभ्यत एव । अयन्तु न तथा । तदर्थभूते विधेये कदाऽप्यदर्शनात् । शित्किदित्यादौ समीपे अवयवात्वारोपेण समासो बोध्यः ।

### अनेकान्ताः अनवयवत्वबोधकयुक्तः –
अर्थात् यदि अनुबन्धानामवयवत्वं, तदा मेङ् धातुः ङकारान्तः । अनुबन्धलोपोत्तरं तस्य धातोरेजन्तत्वेऽपि ङकारस्यानुबन्धलोपात् पूर्वमुपदेशावस्थायामेजन्तत्वाभावेन धातोरवयवस्यैकारस्य 'आदेच उपदेशेऽशिति'[3] इति सूत्रोण आत्वाऽप्राप्त्या 'उदीचां माङो व्यतीहारे'[4] इति सूत्रो माङ् इति निर्देशः कथं सङ्गच्छते ।

**अनेकान्ता अवयवत्वबोधयुक्तयः –**

अर्थात् अनेकान्ता अवयवाः इत्यर्थे आतश्च इति निर्देशाऽसङ्गतिः । तत्राट इति समुदायस्यानर्थकत्वेनाप्रातिपदिकत्वात् समुदायात् विभक्तिः न स्यात् ।

तिप्–शप् इत्यादो पकारादीनामनवयवत्वेन स्वत एव निवृत्या तेषां 'तस्य लोपः' इत्यनेन लोपविधानस्य वैयर्थ्यापत्तिश्च अनवयत्वेन बोधकान्त्यपद–घटितल्लन्त्यसूत्रास्वारस्यभङ्गापत्तिश्च । एवं हि अनुबन्धा अनवयवाः उतावयवाः । पक्षद्वयेऽपि दोषसत्वादित्याशयेन परिभाषेन्दुशेखरे नागेशेनोक्तम् इत्संज्ञका अनुबन्धा तेष्ववयवत्वानवयवत्वसंदेह अत आह अनेकान्ता अनुबन्धा इति ।

**अनेकान्तत्वपक्षोपपत्तयः –**

अनुबन्धा अवयवा उतानवयवा इति संदेहे प्रथमतः अनुबन्धानामनेकान्तत्वपक्षोपपादनाय अनेकान्ता अनुबन्धा इत्यवदत् । अस्यामर्थः अनेकान्ताइत्यस्यानवयवा इत्यर्थः। यथा शाखादयो वृक्षस्यावयवास्तथैतेऽनुबन्धाः प्रत्ययादीनामवयवा न भवति । यथा वृक्षै साकमेव शाखादयः दृश्यन्ते । तथैव अनुबन्धवर्णाः कदापि लक्ष्ये न दृश्यन्ते ।

शित्किदित्यादौ विधेयसमीपवर्तिनि शकारादाववयवत्वारोपेण शकार इत् यस्य सः इत्यर्थलाभान्न दोषः। तथा च शित्किदित्यादिपदानां चेत्संज्ञकशकारादिसमीपेऽवयवत्वारोपे 'उपदेशेऽजनुनासिक इत्'[५]इति सूत्रस्थोपदेशपदस्य 'अग्र ऑ अटितः' इति प्रयोजनप्रतिपादनपरं भाष्यमेव मानम् । नन्वेवं समीपेऽवयवत्वारोपेण शित्किदित्यादौ बहुव्रीहि समासमाश्रित्य सत्समीपवर्ती शकारककारादिरिदित्यर्थवर्णेनेन पूर्वोक्तातिप्रसङ्गवारणेऽपि वुञ्छण् कठेत्यत्र णकारानुबन्धस्य प्रत्ययकप्रत्ययोभयनिरूपितसामीप्यमस्तीति कप्रत्ययस्यापीत्संज्ञकणकार–समीपवर्तित्वरूपणित्वस्य विद्यमानत्वेन णित्वप्रयुक्ता वृद्धिः स्यात् । तथा 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यच' इत्यनेन विहितल्युप्रत्ययान्ते तपनः इत्यादौ च णित्वप्रयुक्तवृद्धिस्स्यादिति चेत् –

उच्यते गुरूमुखावगतप्रयोगदर्शनमूलकाद्यदुपदेशप्रयुक्ता यस्येत्संज्ञा तत्प्रयुक्तं कार्यं तस्यैव इति व्याख्यानाद् 'वुञ्छण्कठ'[६] इत्यादौ णित्वप्रयुक्तं कार्यम् पूर्वस्यैव भवतीति तपनः इत्यादौ णित्वप्रयुक्ता वृद्धिः न भवति । न च अनुबन्धनामनवयवत्वे अइउण् इत्यादौ णादेरित्वानापत्तिः । 'हलन्त्यम्'[७] इति सूत्रो अन्त्यशब्दे लक्षणामाश्रित्य तया परसमीपबोधकत्वरूपार्थश्रयणेनोपदेशकरणभूता ये धात्वादयः तेभ्यः परस्य अन्त्यवर्णस्य इत्संज्ञाविद्यानेनाऽदोषात्।

**एकान्ता अनुबन्धः इति सिद्धान्त विचारः –**

अनुबन्ध एकान्ता एव, न त्वनेकान्ता अर्थात् अवयवाः भवन्ति । तेषामनवयत्वपक्षस्वीकारे 'उभयपदमनुबन्धे किमत्र न्याय्यम्? एकान्ता इत्येव न्याय्यम्' इति सिद्धान्तभाष्यग्रन्थविरोधापत्तेः । अतोऽनुबन्धानामेकान्तत्वमेव न्याय्यम् । अत्रैकान्तशब्दोऽययवार्थबोधकः । यथा गृहादीनामनवयवाः काकादयः एकाजीयसम्बन्धेन संयोगसम्बन्धेन गृहवृक्षादिषूपलभ्यते तथा अयमनुबन्धवर्णो न तादृशसम्बन्धेन समुपलभ्यते इति कृत्वाऽनुबन्धानामवयवत्वमेवोचितम् ।

अनुबन्धवर्णानामवयवत्वोदव 'हलन्त्यम्' इत्यत्रान्त्यशब्दस्य समीपार्थबोधकलक्षणाश्रयणप्रयुक्तं गौरवमपि न भवति । तेषामवयवत्वानङ्गीकारे तु 'इदम् इश्' इत्यादाविशादीनां शस्येत्संज्ञासिद्धये हलन्त्यमित्यात्रान्त्यपदस्य लक्षणया परसमीपबोधकत्वं पूर्वपक्षिणो मतेऽगत्या आश्रयणीयमिति महद्गौरवम् ।

किञ्च अनवयत्वे णशकप्रत्ययादौ णादेस्त्विानापत्तिः । तेषां प्रत्ययादित्वाभावात् । तत्रानवयवत्वादिना णशकप्रत्ययानामादिशब्दे लक्षणायाः अस्वीकारे तेषां णशकवर्णानां प्रत्ययत्वादित्वाभावेन 'आदिञ्टुडवः'[८] इति सूत्रेणेत्संज्ञानापत्तिः । किञ्चानुबन्धामवयवत्वानङ्गीकारे चितः इत्यादीनामित्संज्ञकचकारसमीपवर्तीत्यादिरूपेणेवार्थाद् द्वयसचि चकारेणैव दघ्नचोऽपि चित्त्वप्रयुक्तस्वरसिद्ध्या 'प्रमाणे द्वयसच्'[९] इत्यादि सूत्रस्थदघ्नच्प्रत्ययटकचकारग्रहणस्य वैयर्थ्यापतिः । अनुबन्धनामनवयवत्वपक्षस्वीकारे प्रकृतभाष्याऽसङ्गतिस्स्पष्टैव । इदञ्च 'तस्य लोपः' इत्यत्र भाष्ये स्पष्टम् । तत्र ह्युक्तम् एकान्ता इत्येव न्याय्यम् इति दिक् । अतोऽजानुबन्धनामवयवत्वपक्ष एव मूर्धन्यतया आश्रयणीयः, स एव पक्षो महाभाष्यादिग्रन्थकारसंमतश्चेति नागेशाशयः ।

**अनेकाल्त्वम् अनुबन्धः इति सिद्धान्त विचारः**

अनुबन्धा अनेकाल्त्वम् एव । परिभाषेन्दुशेखरे 'तस्य लोपः' इति सूत्रस्थं 'एकान्ता इति एव न्याय्यम्' इत्याकारकं सिद्धन्तभाष्यमपि प्रमाणतया प्रदर्शितम् । नन्वेवमनुबन्धानामेकान्तत्वस्वीकारे सर्वे इति लक्ष्ये सर्व + अस् इति स्थिते 'जसः शी'[१०] इति सूत्रेण विधीपमानस्य 'शी' आदेशस्य सर्वादेशत्वविधानाय 'अनेकात् शित्सर्वस्य'[११] इति सूत्रे शिद् ग्रहणं कृतं भगवता पाणिनिना । अनुबन्धनामेकान्तत्वे तु शी इति आदेशस्यानेकाल्त्वादेव सर्वादेशत्वे सिद्धेऽत्र सूत्रे शिद्ग्रहणं व्यर्थ स्यादिति । एवमेव 'अष्टौ' इत्यादि प्रयोगे 'अष्टाभ्य औश्' इति औशाद्यादेशेऽपि सर्वत्र अनेकाल्वात् सर्वादिशत्वसिद्धिः सम्भवति ।

एवं तर्हि अनेकात् शित्सर्वस्य इति शिद्ग्रहणं व्यर्थम् । तद्व्यर्थीभूय 'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषां ज्ञापयति । ज्ञापितायां च तस्यामनुबन्धविनिर्मुक्तस्यैव पदार्थोपस्थित्या शकारस्येत्संज्ञालोपयोरनन्तरम् इकारस्यैकाल्त्वेनानेकाल्त्वाभावेन च शी आदेशः सर्वादिशत्वेन न प्राप्नोति । तस्य सर्वादिशत्वार्थमनेकाल्शित्सर्वस्य इति सूत्रं शिद्ग्रहणं स्वांशे चरितार्थम् ।

अनुबन्ध प्रयुक्तस्य अनेकाल्त्वस्य अभावादेव अर्वा इति रूपं सिद्ध्यति । अर्वन् शब्दस्य प्रथमैकवचने अर्वन् + स् इति स्थिते अर्वन् शब्दस्य स्थाने अर्वणस्त्रसावनञः इति सूत्रेण विधीयमानस्य तृ इत्यादेशघटक ऋकारस्यावयवत्वाभावेन अलोऽन्त्यपरिभाषया तस्यान्तादेशे कृते अर्वा इति प्रयोगः भवति । ननु 'भविता' इत्यादौ तिपः स्थाने 'लुटः प्रथमस्य डारौरसः'[१२] इति डादेशः अनेकाल्त्वात् सर्वादिशः भवति, तन्नोपपद्येत, अनुबन्धडकारस्य अनवयवत्वे अनेकाल्त्वाभावात् इति चेन्न, आदेशकरणानान्तरमेव सः स्थानिवद्भावेन् प्रत्ययः भवति । तदा तस्य 'चुटू'[१३] इति सूत्रेण प्रत्ययादिटर्गीयस्य डकारस्य इत्संज्ञा भवति । ननु ततः पूर्वम् । अतः आदेशकाले डकारलोपाभावात् अनेकाल्वात् सर्वादिशो भवति ।

**अनेजन्तत्वम् अनुबन्धः इति सिद्धान्तविचारः**

अनुबन्धा अनेजन्तत्वम् एव । अर्थात् अनुबन्धेन कारणात् अनेजन्तत्वं मा उक्तं शक्यते । अनुबन्धानामावयवत्वपक्षे प्रसक्तं द्वितीयदोषमुद्धर्तुं नन्वेवमप्यवदातं मुखमित्यत्र इत्यायदिग्रन्थेन नानुबन्धकृतमनेजन्तत्वमिति परिभाषामवतारयति नागेशः ।

दैप् धातोः पकारस्य दै – इत्स्यावयवत्वेन दैप् धातोरनेजन्तत्वात् ''आदेच उपदेशेऽशिति'' इति सूत्रेण दैधात्ववयवस्यैकारस्य आत्वं न प्राप्नोति । दैधातोः पकारलोपोत्तरमात्वे कृतेऽपि 'दाधध्वदाप्'[१४] इति सूत्रे अदाबिति निषेधेन दा इत्यस्य घुसंज्ञानिषेध्स्याप्रवृत्तौ घुसंज्ञायां प्राप्तायाम् अवदातमिति प्रयोगस्य साधुत्वानापत्तिरित्याशङ्कायां नानुबन्धकृतमनेजन्तत्वमिति परिभाषा अवतरति ।

उदीचां माङ् इति निर्देशोऽस्या ज्ञापकः अर्थात् ''उदीचां माङो व्यतीहारे'' इति सूत्रे माङ् इति निर्देशोऽस्याः परिभाषायाः ज्ञापकः । 'आदेच उपदेशे' इति सूत्रेणोपदिश्यमानस्यैजन्तस्यात्वं क्रियते । एतत्परिभाषाऽभावेऽनुबन्धानामवयवत्वपक्षे मेङ्घत्ववयवत्वेन तस्य धातोरूपदेशेऽनेजन्तत्वेन आदेश उपदेशेऽशिति इति सूत्रेणात्वाप्राप्त्या तस्मिन् सूत्रो माङ् इति निर्देशः कथं सङ्गच्छते । स च निर्देशः इमां परिभाषां ज्ञापयतिनानुबन्ध– कृतमनेजन्तत्वमिति । ज्ञापितायान्तु तस्यां मेङ्धात्ववयवस्यान्त्यस्य ङकारस्य कार्याप्रयोजकत्वेन तद्धात्वावयवस्यैकारस्यात्वप्रवृत्त्या 'उदीचां माङो व्यतीहारे' इति निदेशः स्वांशे चरितार्थः । अर्थात् ङकारसत्वे त्वेजन्तत्वायावात्वाप्राप्तेस्तस्यासङ्गतिः ।

ननु ज्ञापनोत्तरमपि कथं माङ इति निर्देशोपपत्तिः । एशिरंजादीनामात्ववारणाय 'लिटि धातोरनभ्यासस्य' इत्यतस्तत्र धातुग्रहणानुवृत्तेरावश्यकतया ङकारसत्वे मेङ् इत्यस्य धतुत्वाभावेनात्वाप्राप्तेः । अनुबन्धलोपोत्तरमेव धातुत्वामित्यर्थस्य न धातुलोप आर्धधातुके इति सूत्रे भाष्यकैयटयोः स्पष्टत्वात् । तथा च केवलस्य मे इत्यस्या धातुत्वेन तदवयवस्यैकारस्यात्वाऽप्राप्तेरिति चेत् – आत्वविधायके ''आदेच उपदेशेऽशिति'' इति सूत्रो धातोरित्यस्यानन्वृत्तेर्मे इत्यस्य धातुत्वाभावेऽपि तदवयवस्यैकारस्यात्वसिद्ध्या न दोषः । एतत्सर्वं 'दाधध्वदाप्', 'तस्यलोपः' इति सूत्रयोर्भाष्ये स्पष्टम् ।

**असारूप्यम् अनुबन्धा इति सिद्धान्त विचारः**

नानुबन्धकृतमसारूप्यम् अर्थात् अनुबन्धेन कारणात् असारूप्यमाभवति । अत्र अण् तथा च क प्रत्ययानां विरूप्यं तस्मात् कारणात् क इत्यनेन अण् वा बाधितं कारणात् क विषयेऽणोप्यापत्रिरित्यत आह –तात्पर्यमिदं ननु एवमपि वासरूपसूत्रेण क विषयेऽणेऽप्यापत्तिरित्यत आह – नानुबन्धकृतमसारूप्यम् । 'वाऽसरूपोऽस्त्रियाम्'[१५] इति परिभाषासूत्रम् । यत्रासरूपापवादप्रत्ययपि धनं तत्र वा इत्युपतिष्ठते इति सूत्रार्थः । इदं सूत्रं कृत्प्रत्ययानां विषये अपवादः उत्सर्गस्य वा बाधको भवति, स्त्रियां क्तिन् इति अधिकारे तु नेति बोधयति । यथा – तव्यप्रत्ययः उत्सर्ग 'ऋहलोर्ण्यत्'[१६] इति ण्यत् प्रत्ययः अपवादशास्त्रम् । उभौ

असरूपौ । अत: 'वाऽसरूप:' परिभाषया अपवादस्य वैकल्पिकबाधकत्वात् कर्तव्यम्, कार्यम् इति द्वे रूपे भवत: । अनुबन्धानामवयवत्वपक्षस्वीकारे क–अण् उभावति असरूपौ भवत: । अत: पूर्वोक्तपरिभाषया विकल्पेन बाधकत्वे 'आतोऽनुपसर्गे क:'[१७] इति कविषयेऽपि अण् प्राप्नोति । तथा सति गां ददाति – गो: इतिवत् गोदाय: इति रूपमपि स्यात् । तद्दारणार्थम् – नानुबन्धकृतमसारूप्यम् इति परिभाषा अवतारिता । अपवादप्रत्ययस्योत्सर्गनिरूपितमनुबन्धप्रयुक्तमसारूप्यं नैवाश्रयणीयं इति तत्परिभाषार्थं ।

'ददातिदधात्यार्विभाषा' (३/१/१३९)[१८] इति णबाधकशस्य विकल्पविधायकमस्यां ज्ञापकम् । 'श्याद्व्यधेत्यादि'[१९] सूत्रेण णप्रत्यय: विधीयते । 'ददाति.' इत्यनेन दाञ्, धाञ् धातुना श प्रत्यय विधीयते तेन 'दद:', 'दध:' इति रूपं सिद्ध्यति । उभयो: असरूप्पात् 'वाऽसरूपन्यायेन' विकल्पेन बाधकत्वे सिद्धे, 'ददातिदधात्योर्विभाषा' इति सूत्रघटकं विभाषाग्रहणं व्यर्थम् । तद्व्यर्थीभूय इमां परिभाषां ज्ञापयति । ज्ञापितायाञ्च तस्यां गोद: इत्यादौ येन नाप्राप्तिन्यायेन नित्यमेव णप्रत्ययं बाधित्वा कप्रत्यय: वर्तत इति कृत्वा विभाषाग्रहणं स्वांशे चरितार्थम् । एतत्सर्वं वासरूपोऽस्त्रियामिति सूत्रे भाष्ये स्पष्टम् अर्थात् तेन गोद: इत्यादौ नाणिति वासरूपसूत्रे भाष्ये स्पष्टम् । एतत् प्रकारेण अनुबन्धविषये भिन्न–भिन्न मता: प्रदर्शयन् ।

**सहायकग्रन्था:**

१. वैयाकरणसिद्धान्तकौमुदी (१.३.९) ।
२. सिद्धान्तकौमुदी (३.१.६८) ।
३. अष्टाध्यायी (६.१.४५) ।
४. वै. सिद्धान्तकौमुदी (३.४.१९) ।
५. परिभाषेन्दुशेखरे (परिभाषा–७) ।
६. परिभाषेन्दुशेखरे (परिभाषा–४) ।
७. लघुसिद्धान्तकौमुदी (१.३.३) ।
८. वै. सिद्धान्तकौमुदी (१.३.५) ।
९. परिभाषेन्दुशेखरे (परिभाषा–५) ।
१०. लघुसिद्धान्तकौमुदी (७.१.१७) ।
११. नागेशगूढार्थदीपिका ।
१२. वैयाकरणसिद्धान्तकौमुदी (२.४.८५) ।
१३. लघुसिद्धान्तकौमुदी ।
१४. अष्टाध्यायी (१.१.२०) ।
१५. विजयाटीका ।
१६. अष्टाध्यायी (१.३.७) ।
१७. परिभाषेन्दुशेखरे (परिभाषा–७) ।
१८. वै. सिद्धान्त कौमुदी (३.१.१३९) ।